# श्रीमद्देवीभागवतपुराणे ग्रहचिन्तनम्

**डाहरिनारायणधर द्विवेदी.**
सहाचार्यः/संयोजक:
ज्योतिषशास्त्रविद्याशाखा
केन्द्रीयविश्वविद्यालयः-संस्कृत-
लखनऊपरिसरः (.प्र.उ)

पुराणों के निर्माण का उद्देश्य ज्ञान रूपी वेद के यथार्थ अर्थ हेतु ही माना जाता है। वेद का नेत्र ज्योतिष शास्त्र होने से पुराणों में ज्योतिष शास्त्र की चर्चा अवश्य ही प्राप्त होती है। अतः श्रीमद्देवीभागवत में भी विविध ज्योतिष शास्त्र के तत्त्व विद्यमान होते हैं। प्रस्तुत प्रबन्ध में ब्रह्मा की आयु, सूर्य गति, सूर्य स्थिति इत्यादि तत्त्वों की विस्तृत परिचर्चा की जा रही है।

सर्वेषां शास्त्राणां वेत्रा महर्षिवेदव्यासेन प्रसिद्धे श्रीमद्देवीभागवते ज्योतिषशास्त्र तत्त्वविवेचनं नूनमेव व्यधायि। ज्योतिषशास्त्रं वेदपुरुषस्य नयनद्वयरूपंवेदाङ्गेषु महत्पूर्णं स्थानं लभते। येन प्रकारेण वेदाः पूजिताः ,प्रसिद्धाश्च वर्तन्ते तथैव ज्योतिषशास्त्रमपि लोकप्रसिद्धं लोकोपकारकं च वर्तते। अत एव वेदाङ्गे अस्य स्थानं शिक्षादिषु ग्रन्थेषु निगदितं वर्तते-

**''छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथपठ्यते। ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते।**

**शिक्षाघ्राणं वेदस्य मुखंव्याकरणं स्मृतम्। तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते।1''**

अत एव पुराणेषूपपुराणेषु सर्वत्र ज्योतिषशास्त्रप्रस्य चर्चा प्राप्यते अस्मिन् विषये भणितं विद्यते-

**इन्द्रायुश्चैव दिव्यानां युगानामेक सप्ततिः।**

**अष्टाविंशे शक्रपाते ब्रह्मणश्च दिवानिशम्।।**

**एवं त्रिंशद्दिनैर्मासो द्वाभ्यामाभ्यामृतुः स्मृतः।**

**ऋतुभिः षड्भिरेवावदं ब्रह्मणो वै वयः स्मृतः2**

अस्याशयः वर्तते एकसप्ततिः )71 (दिव्ययुगानां मेलयित्वा एकः इन्द्रायुः भवति। अयं इन्द्रायुः अष्टधा यदा गच्छ ति तदा एकः ब्रह्मणः दिव्य दिनं भ वति। एवमेव त्रिंश द्दिव्यदिनानां

मेलयित्वा एकः दिव्यमासः भवति। दिव्यमा सद्वयेन एकः ऋतुः भवति। षड् -ऋतूनाम् एकं वर्षं द्वादशमासात्मकं भवति। एवञ्च शतं दिव्यवर्षमादाय ब्रह्मायुः भवति।

**वासना द्विविधा प्रोक्ता शुद्धा च मलिना तथा।**

**मलिना जन्मनो हेतुः शुद्धा जन्मविनाशिनी।।** 1.1.10

ब्रह्मणः आयुविषये निगदितं देवीभागवते-

**ततः परस्तादचलो लोकालोकेति नामकः।**

**अन्तराले च लोकालोकयोर्यः परिकल्पितः।।**

**यावदस्ति च देववर्षे ह्यन्तरं मानसोत्तरात्।**

**सुमेरोस्तावती शुद्धा काञ्चनी भूमिरस्ति हि।।**3

अस्मिन्नेव पुराणे सूर्यस्य गति -विषये चर्चा प्राप्यते ,पुष्फरद्वीपे शुद्धोदसागरात् अग्रे लोकालोक नामकं एकं विशालः पर्वतः विद्यते। अत्र द्विप्रकारकः लोकः प्राप्यते ,तत्र एकस्मिन् लोके प्रकाशः प्राप्तः भवति द्वितीये लोके प्रकाशाभावः दृश्यते। द्वयोर्मध्ये पर्वतो यं सीमांशरूपः वर्तते।

मानसोत्तर पर्वतात् सुमेरुपर्वतपर्यन्तं यावत् लम्बमानम् आयतं दूरं वर्तते ,तथैव अस्य पर्वतस्य परिमापः वर्तते। अत्र सर्वसाधारण -प्राणिनः वासं न कर्तुं शक्यन्ते। स्थानमिदं देवानां वासाय वर्तते। यदि अत्र कोपि पदार्थं उच्चैः अधः पतति तदापि पृथक् खण्डितो न भवति। अतः अत्र मात्रं देवाः एव निवसन्ति।

अस्य पर्वतस्याधीनं सूर्यादारभ्य ध्रुव ,ग्रह ,नक्षत्रदीनि वर्तन्ते। अस्मात् कारणादेव एतेषां ग्रहनथ्तत्राणां प्रकाशः लोकालोक पर्वतात् पृष्ठे निवासिनां जनानां कृते प्रकाशरम्भवति। लोकालोक पर्वतमुपरि ब्रह्मणः चत्वारः दिग्पालाः भवन्ति। इमे सर्वे लोकान् रक्षन्ति। पृथिव्याकाशयोर्मध्ये ब्रह्मण्डं विद्यते ,अस्य मध्यभागे सूर्यः निवसति। एवमेव सूर्यमण्डलात् ब्रह्माण्ड मण्डलं भूमण्डालात् पञ्चविंशति योजनात् दूरं विद्यते।

**तावदेवापदो दूरे तिष्ठन्ति परिपेलवाः।**

**यावदेव न महोस्य प्रसरः पुत्र दीयते।। 1.1.102**

मृतनाम चेतनशून्याण्ड स्थितः सूर्यस्य नाम मार्तण्डोपि भवति। हिरण्यभयात् ब्रह्माण्डात् उत्पन्नात् सूर्यस्यापरः नाम हिरण्यगर्भोपि वर्तते। अत एव अयं सूर्यः दिक् ,काल ,आकाश , अन्तरिक्ष ,पृथ्वी ,स्वर्ग ,नरक ,पातालादीनां विभाजको भवति। यदि अयं सूर्यः न स्यात्तदा इयं सृष्टिरपि न स्यात्। सर्वेषां देव ,दानव ,मानव ,पशु ,पक्षी ,स्थावर ,जंगम प्राणिनां प्राणस्वरूप आत्मा सूर्यः एव भवति। उक्तं हि विद्यते देवी भागवते-

**सूर्याण्डगोलयोर्मध्ये कोट्यः स्युः पञ्चविंशतिः।**

**मृतेण्ड एष एतस्मिञ्जातो मार्तण्डशब्द भाक्।।**

**हिरण्यगर्भ इति यद्धिरण्याण्ड समुद्भवः।**

**सूर्येण हि विभज्यन्ते दिशः खं द्यौर्महीभिदा।।**

**स्वर्गापवर्गौ नरका रसौकांसि च सर्वशः।**

**देवतिर्यन्मुष्याणां सरीसृपसवीरुधाम्।।**

**सर्वजीवनिकायानां सूर्य आत्मा दृगीश्वरः।**

**एतावान्भूमण्डलस्य सन्निवेश उदाहृतः।।4**

सूर्यस्य त्रिधा गतिर्भवति -1 .शीघ्रः 2. मन्दः 3. समः तथैव ग्रहणां अवस्थात्रयं भवति। 1. जारद्गवः 2. ऐरावतः 3. वैश्वनारः। एवमेव सूर्यस्य गतेः सज्ञारुपम्भवति ,आरोहणम् अवरोहणञ्च। इयं गतिः जारद्गवः मध्ये भवति ,ऐरावतः उत्तरे भवति ,वैश्वनारः दक्षिणे भवतिः। प्रत्येकं दिशि

**अव्युच्छिन्नचिदात्मैकः पुमानस्तीह नेतरत्।**

**स्वसंकल्पवशाद्बद्धो निःसंकल्पश्च मुच्यते।। 1.3.47**

वीथीत्रयं भवति। अस्यां वीथौ अश्विनी ,भरणी ,कृत्तिकानां नागवीथी कथ्यते। रोहिणी , मृगाशिरा आर्द्राणां गजवीथी भवति। एवमेव पुनर्वसु ,पुष्प, श्लेषानां ऐरावतवीथी कथ्यते। मघा , पूर्वाफाल्गुनी ,उत्तराफाल्गुनीनां आर्षवीथी कथ्यते। हस्त ,चित्रा ,स्वातीनां गोवीथी भवति।

विशाखा ,अनुराधा ,ज्येष्ठानां जारद्गववीथी भवति। मूल ,पूर्वाषाढ़ा ,उत्तराषाढा नां अजवीथी भवति। श्रवण ,धनिष्ठा ,शतभिषानां मृगवीथी भवति। पूर्वाभाद्रपद ,उत्तराभाद्रपद ,खेतीनां वैश्वानरवीथी भवति। अजवीथी ,मृगवीथी ,वैश्वानरवीथीनां दक्षिमार्गः भवति। उक्तं विद्यते-

**उदयास्तसमये चैव सर्वकालं तु सम्मुखे।**

**दिशास्वशेषासु तथा सुरर्षे विदिशासु च।।**

**यैर्यत्र दृश्यते भास्वान् स तेषामुदयः स्मृतः।**

**तिरोभावं च यत्रेति तत्रैवास्तमयं रवेः।।**

**नैवास्तमनमर्कस्य नोदयः सतः।**

**उदयास्तमनाख्यं हि दर्शनादर्शनं रवेः।।5**

सुमेरुपर्वते ये प्राणिनः निवसन्ति तेषां मध्याहनस्य सदैव प्रतीतिः भवति। यद्यपि सूर्य-रथः सर्वदा सुमेरुतः वामे प्रचलति। तथापि तेजो वायुना प्रेरणया दक्षिणादिशि सूर्यो भवति। सूर्यः उदयकाले अस्तकाले च सर्वदा सर्वेषां सम्मुखो भवति। अतएव दिशासु विदिशासु ये के ऽपि प्राणिनः निवसन्ति सर्वेषां प्राणिनां कृते सूर्यस्य दर्शनं भवति। एवं उदयास्त कालः

ज्ञातज्ञेयस्य मनसो नूनमेतद्विलक्षणम्।

न स्वदन्ते समग्राणि भोगवृन्दानि यत्पुनः।। 1.3.5.6

अपने 'ज्ञेय 'को भली-भाँति समझने वाले )व्यक्ति के (मन की यह निश्चत विशेषता है क उसे समस्त भोगवृन्द पुनः आकर्षित नहीं करते हैं।

सर्वेषां कृते निर्धारितो भवति। वस्तुतः सूर्यस्योदयः अस्तश्च न भवति। सप्तर्षिमण्डलात् ध्रुवलोकः त्रयोदशलक्षमुपरिवर्तते ,अस्य नाम विष्णुपादोपि वर्तते। अत्रैव त्रिलोकवन्दितः ध्रुवः निवसति। देवनम्यः ध्रुवः कथ्यते ,यतोहि इन्द्र ,अग्नि ,कश्यपादि मुनयः ध्रुवं दृष्ट्वा प्रणामाञ्जलिं समपर्यन्ति। कालः कदापि स्थितो न भवति। दृष्टोपि न भवति ,अस्य कालस्य ध्रुव ,नक्षत्रादयः ज्योतिर्गणाः निरन्तरं भ्रमणं कुर्वन्ति। ऐषां केन्द्रस्वस्यः ध्रुवः भवति। सर्वेग्रहाः ध्रुवं परितः भ्रमन्ति। इमे ग्रह्यः वायुना प्रेरिताः भवति।

लोके यथा श्येन-पक्षी आकाशे विचरति तथैव भ्रमणशीला सर्वेपि ग्रहाः ध्रुवं भ्रमन्ति ,भूमौ न पतन्ति। यतोहि प्रकृति-पुरुष-द्वयरुप ब्रह्म सदा इमान् रक्षन्ति उक्तं विद्यते-

''अधस्तात्सवितुः प्रोक्तमयुतं राहुमण्डलम्।''

सिहिंका गर्भादुत्पन्नः राहुः नक्षत्रसमम् आकाशे विचरति। यद्यपि सूर्य-चन्द्रयोः यथा समये कष्टं ददाति ,तथापि विष्णुभगवता प्रसादेन अमरत्वं प्राप्तः राहुः ब्रह्मणः विधानात् ग्रहदेवतासु मध्ये परिगणितो भवति। राहु -ग्रहात् नीचैः सिद्धचरणानां विद्याधारणां पावनः लोकः विद्यते। अस्मिन्नेव पुराणे अन्तरिक्षतस्य विषयेऽपि बहुसुन्दरं वर्णनं प्राप्यते। यथा-

**''ततोप्यधस्ताद्देवर्षे यक्षाणां च सरक्षसाम्।''**

**पिशाचप्रेतभूतानां विहाराजिरमुत्तमम्।।**

**अन्तरिक्षं चलत्प्रोक्तं यावद्वायुः प्रवति हि।**

**यावन्मेधास्तथोद्यन्ति तत्प्रोक्तं ज्ञानकोविदैः।।6**

उपर्युक्त-व्याख्यानेन वक्तुं शक्यते देवीभागवते ज्योतिषशास्त्रस्य अद्भुतं तथ्यपूर्णं विवेचनं विद्यते। इत्थं महर्षि वेदव्यासेन अन्येष्वपि पुराणेषु ज्योतिष शास्त्रस्य वेदाङ्गत्वकारणात् ज्योतिशास्त्रतत्त्वपरिचर्चा कृता दृश्यते।

**सन्दर्भसङ्केता-**

1. पाणिनीय शिक्षा श्लो. 41, 42
2. श्रीमद्देवीभागवत-09-38-50, 51
3. तत्रैव-8-14-1, 2
4. तत्रैव-8-14-17, 18, 19, 20
5. तत्रैव-8-14-22, 23, 24
6. तत्रैव-8-18-10, 11

**सन्दर्भग्रन्थाः**

1. डॉ. सत्यप्रकाशदुबे, आचार्यशम्भुदयालपाण्डेय, दयानन्दभार्गव पाणिनीयाशिक्षा राजस्थानी ग्रन्थागार, जोधपुर सोजतीगेट, जोधपुर (राज.) दूरभाष-2623933, 2432567
2. भारतीय विद्याप्रकाशन 1, यू. बी. जवाहरनगर, बंग्लोरोड, दिल्ली-110007, फोन नं. (011) 3971570, ISBN-81-217-0163-5